শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

## ৱিল্লূর্ নডাদূর্ শ্রী শ্রীনিধেঃ কৃতিষু

# ॥ শ্রীস্তোত্রম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীস্তোত্রম্ ॥

কৱিতাজিতকল্লোলিকন্যকাকান্তৱক্ষসে।
করুণাদিগুণাঢ্যায কমলানিধযে নমঃ ॥

মাতঃ ! কোমলৱল্লি ! মন্মন ইদং যুষ্মৎকটাক্ষাভিধং
ভৃঙ্গং ৱাঞ্ছতি ঝঙ্কৃতিঃ পরতরা যস্যেদৃশী রাজতে।
অন্যোন্যং ধনহেমসঙ্গতিৱশাদস্মন্মনঃকর্ণযো -
রানন্দং দদতী ঋণজ্ঝণদিতি প্রক্রান্তলীলারসা ॥ 1 ॥

জননি ! কোমলৱল্লি ! কৃপানিধে !
জনমিমং কৃপণং শরণাগতম্।
সকলতাপনিৱারণলম্পটৈ -
স্সকৃদিৱ স্নপযস্ৱ ৱিলোকনৈঃ ॥ 2 ॥

ক্ষীরাম্ভোধৌ জনকসদনে ভাসি কান্তেন মাতঃ !
কামং চাস্মিন্ কনকতটিনীসৈকতে মাতৃগেহে।
দৃশ্যস্সোঽযং ন খলু ৱিবুধৈরপ্যহো তত্র নাথঃ
মন্দানাং নঃ পথি নযনযোরত্র কৢপ্তো ভৱত্যা ॥ 3 ॥

শৈলে কাননদুর্গমে কথমমী গন্তুং ক্ষমা বালকাঃ
ইত্যেৱং করুণারসার্দ্রহৃদযা কান্তস্য কান্তং পরম্।
ৱক্ষস্তচ্চ ৱিহায পদ্মসদনে ! জাযে ! ৱৃষাদ্রীশিতুঃ
তস্যাদ্রেঃ কিমুপত্যকাপরিসরে ৱাসং ৱ্যধা নঃ কৃতে ॥ 4 ॥

পরাঙ্মুখং নাম ৱিধের্ৱিলাসা -
ন্নতেষ্ৱমুং সম্মুখমাদধানা।

নাথং রমে ! তৎপুরতো নিৱিষ্টা
তমীক্ষসে কিং করিশৈলমূর্ধ্নি ॥ 5 ॥

সুন্দরৱল্লি ! ৎৱামালিঙ্গন্
সুন্দরবাহুর্ৱনশৈলেন্দ্রঃ।
সুন্দরৱদনস্সুন্দরৱর্ষ্মা
সুন্দরনামা জযতি পতিস্তে ॥ 6 ॥

সীতে ! মাতর্ৱড়ুৱূর্নিলযে !
ৎৱত্তো নান্যা মম গতিরস্তি।
ৎৱযি কৃতমাগশ্শতমপি ৱিদতঃ
ৎৱৎকৃতরাক্ষসৱনিতারক্ষাম্ ॥ 7 ॥

যদুকুলপালকগোকুলবালক -
কৌতুকদাযিনি ! রুক্মিণি ! মাম্।
বালকপালককৌতুকদারিণি !
পালয পালয রুক্মিণি ! মাম্ ॥ 8 ॥

হৈযঙ্গৱীননটৱক্ষসি ভাসমানে !
সৌহিত্যদূরললিতামৃতপার্শ্ৱজাতে !।
মাতস্সুৱর্ণমযি ! মাং মধুরৈঃ কটাক্ষৈঃ
হে লক্ষ্মি ! শীতলতমৈশ্শিশিরীকুরুষ্ৱ ॥ 9 ॥

শ্রিযস্স্তোত্রমিদং ভৱ্যং শ্রীমচ্ছ্রীনিধিনা কৃতম্।
শ্রদ্ধযা পঠতাং নিত্যং শ্রীরাগচ্ছতি মন্দিরম্ ॥ 10 ॥

॥ ইতি শ্রীস্তোত্রং সমাপ্তম্ ॥

sunder kidambi
prapatti dot com
sunder kidambi